M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref. / Ser. 1433

Title: Raghuvamsa
4th Sarga

1433

Incomplete

C

Raghuvamsa . . Sarga 4th : Title

Kalidasa : Author

: Editor

: Year, Vols.

SAC : Publisher

1433 : Remarks

आन्वीक्षिकी त्रयी वार्ता दंडनीतिश्च शाश्वती
एता विद्याः ... लोके ... हेतव
विद्वान् विपश्चिद्दोषज्ञः ... आन्वीक्षिक्यात्मविद्या स्यात् धर्माधर्मौ च ...
शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः २
रम्यं मनोहरं सौम्यं ... शिक्षयामास तु उपाध्यायोऽध्यापकोऽपि

वद्विपश्चितोविनिन्युरेनंगुरवोगुरुप्रियं।अवंध्ययत्नाश्चबभूवुरत्रतेक्रियाहिवस्तू
पहितांप्रसीदति २९ धियःसमग्रैःसगुणैरुदारधीःक्रमाच्चतस्रश्चतुर्णवोप
माः। ततारविद्याःपवनातिपातिभिर्दिशोहरिद्भिर्हरितामिवेश्वरः ३०
त्वचंसमेध्यांपरिधायरौरवीमशिक्षतास्त्रंपितुरेवमन्त्रवत्।नकेवलंतद्गुरुरेकपा
र्थिवःक्षितावभूदेकधनुर्धरोपिसः ३१ महोक्षतांवत्सतरःस्पृशन्निवद्विपेन्द्रभा
वंकलभःश्रयन्निव।रघुःक्रमाद्यौवनभिन्नशैशवःपुपोषगांभीर्यमनोहरंव
पुः ३२ अथास्यगोदानविधेरनंतरंविवाहदीक्षांनिरवर्त्तयद्गुरुः नरेन्द्रकन्या
स्तमवाप्यसत्पतिंतमोपहंदक्षसुताइवाबभुः ३३ युवायुगव्यायतबाहुरं

गावः केशा दीयंते ...
अकार ...
युगं ... युगं युग्मे हस्तादिषु ...

सळः कपाटवक्षाः परिणद्धकंधरः। वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाद
दृश्यत ३४ ततः प्रजानां चिरमात्मना धृतां नितांतगुर्वीं लघयिष्यता धुरं। निसर्गसं
स्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्। ३५ नरेंद्रमूलायतनादनंतरं त
दास्पदं श्रीर्युवराजसंज्ञितं। अगछदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्प
लं ३६ विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव। बभूव तेना
तितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ३७ नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राज
सुतैरनुद्रुतं। अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ३८ ततः परं तेन
मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः। धनुर्भृतामग्रत एव रक्षतां जहार शक्रः
किल गूढविग्रहः ३९ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत्।

वसिष्ठधेनुश्च यदृछयागता श्रुतप्रभावा ददृशेथ नंदिनी ४० तदंगनिष्यंदजलेन लोच
ने प्रमृज्य पुण्येन पुरस्कृतः सतां। अतींद्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनंद
नः ४१ स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः। पुनःपुनः सूतनिषिद्धचापलं
हरंतमश्वं रथरश्मिसंयुतं ४२ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वा
जिभिः। अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्त्तयन्निव ४३ मखांशभाजां प्र
थमो मनीषिभिस्त्वमेव देवेंद्र सदा निगद्यसे। अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघा
ताय कथं प्रवर्त्तसे ४४ त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यच
क्षुषा। स चेत्स्वयं कर्मसु धर्मचारिणां त्वमंतरायो भवसि च्युतो विधिः ४५ तदंगम
ग्र्यं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि। पथः श्रुतेर्दर्शयितार ईश्वरा मलीम

रघु ६

प्रहितां स्वशक्तिभिस्तमाश्रयं दुःप्रसहस्य तेजसः। शशांकशां निर्वापयितुं नवासवस्ततश्च तं व
ज्रमिवाद्रिरंबुदः ५८ ततः प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णवधीरनादिनीं। रघुः
शशांकार्द्धमुखेन पत्रिणा शरासनज्यामलुनाद्बिडौजसः ५९ स चापमुत्सृज्य विवृद्धमत्स
रः प्रणाशनाय प्रबलस्य विद्विषः। महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामंडलमस्त्र
माददे। रघुर्भृशांसामितेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः। निमेषमात्रादवधूय
तद्व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः ६२ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चि
रमस्य तस्थुषः। तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ६२ असंगमद्रि

ष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधं। अवेहि मां प्रीतमृते तुरंगमाद्वरं वृणीष्वेति तमा
ह वासवः ६३ ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिं। नरेंद्रसूनुः प्रति
संहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ६४ अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते
विधिनैव कर्मणि। अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण स्यवदत्सुरेश्वरो ६५
फलेन युज्यतां ६५ यथा स वृत्तांतमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः। तवैव संदे
शाद्धराधिपः पतिः श्रृणोति देवेन तथा विधीयतां ६६ तथेति कामं प्रतिशुश्रुवान्रघो
र्यथागतं मातलिसारथिर्ययौ। नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्य

र.३ वर्त्तते ६७ तमभ्यनंदत्प्रथमंप्रबोधितःप्रजेश्वरःशासनहारिणाहरेः। परामृशान्हर्षजडे
नपाणिनतदीयमंगंकुलिशव्रणांकितं ६८ इतिक्षितीशोनवतिंनवाधिकांमहाक्रतू
नांमहनीयशासनः। समारुरुक्षुर्दिवमायुषःक्षयेततानसोपानपरंपरामिव ६९ अथस
विषयव्यावृत्तात्मायथाविधिसूनवेनृपतिककुदंदत्वायूनेसितातपवारणम्। मुनि
वनतरुछायांदेव्यातयासहशिश्रियेगलितवयसामिक्ष्वाकूणामिदंहिकुलव्रतं ७०
इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौरघुपट्टाभिषेकोनामतृतीयःसर्गः॥ ॥
श्रीः॥ ॥ सराज्यंगुरुणादत्तंप्रतिपद्याधिकंबभौ। दिनांतेनिहितंतेजःसवित्रेवहुता

शनः १ दिलीपानंतरंराज्येतंनिशम्यप्रतिष्ठितं। पूर्वंप्रधूमितोराज्ञांहृदयेग्निरिवोत्थितः
र. २ न्यस्तशस्त्रंदिलीपंचतंचशुश्रुविशांपतिं। राज्ञामुद्धतनाराचेहृदिशल्यमिवार्पितं ३ पु
रुहूतध्वजस्येवतस्योन्नयनपंक्तय। नवाभ्युत्थानदर्शिन्योननंदुःसप्रजाःप्रजाः ४ स
ममेवसमाक्रांतंद्वयंद्विरदगामिना। तेनसिंहासनंपित्र्यमखिलंचारिमंडलं ५ छाया
मंडललक्ष्येणतमदृश्याकिलस्वयं। पद्मापद्मातपत्रेणभेजेसाम्राज्यदीक्षितं ६ परि
कल्पितसान्निध्याकालेकालेचबंदिषु। स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती ७
मनुप्रभृतिभिर्मान्यैर्भुक्तायद्यपिराजभिः। तथाप्यनन्यपूर्वेवतस्मिन्नासीद्वसुंधरा ८

र॰ ४ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं। पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १९ मंदोत्कं
८ ठाः कृतास्तेन गुणाधिकतया गुरौ। फलेन सहकारस्य पुष्पोद्गम इव प्रजाः २० स हि स
र्वस्य लोकस्य युक्तदंडतया मनः। आददे नातिशीतोष्णो नभस्वानिव दक्षिणः २१
पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः। नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् २२
यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा। तथैव सोभूदन्वर्थो राजा प्रकृतिरंजनात् २३
कामं कर्णांतविश्रांते विशाले तस्य लोचने। चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना २४ श्रम ८
लब्धप्रशमनं स्वस्थमथैनं समुपस्थिता। पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा २५

निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः। प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः। २६ अ
धिमायुधं कर्तुं समयोयं रघोरिति। स्वं धनुः शंकितेनेव संजह्रे शतमन्युना २७ वार्षिकं
संजहारेंद्रो धनुर्जैत्रं रघुर्दधौ। प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ २८ पुंडरी
कातपत्रस्तं विकसत्काशचामरः। ऋतुर्विडंबयामास न पुनः प्राप तच्छ्रियं २९ प्रसा
दसुमुखे तस्मिंश्चंद्रे च विशदप्रभे। तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ३० हंसः
श्रेणीषु तारासु कुमुद्वत्सु च वारिषु। विभूतयस्तदीयानां पर्यस्ता यशसामिव ३१
इक्षुच्छायानिषादिन्यः तस्य गोप्तुर्गुणोदयं। आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ३२

अगस्त्यमहा

६

र॰ ४ मे प्रसादोदयात्कुंभः कुंभयोनेर्महौजसः। रघोः परिभवाशंकि चुक्षुभे द्विषतां मनः २३ मदो
दग्राः ककुद्मंतः सरितां कूलमुद्रुजाः। लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं २४ प्रसवैः
सप्तपर्णानां मदगंधिभिराहताः। असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः २५ सरितः कुर्व
तीर्गाधाः पथश्चाश्यानकर्दमान्। यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत् २६ तस्मै सम्य
ग्घुतो वह्निर्वाजिनीराजनाविधौ। प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ २७ स गुप्तमूलप
र्यंतः शुद्धपार्ष्णिरयान्वितः। षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया। २८ अवाकिरन्वयोवृ
द्धास्तं लाजैः पौरयोषितः। पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं २९ स ययौ प्रथमं प्राचीं तु

प्रकाशप्रकाश...

ल्यः प्राचीनबर्हिषा। अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ३० रजोभिः स्यंदनोद्धूतैर्गजै
श्च घनसंनिभैः। भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं ३२ युग्मं प्रतापोग्रे ततः शब्दः परागा
स्तदनंतरं। ययौ पश्चाद्रथानीकं चतुःस्कंधेव सा चमूः ३२ पुरोगैः कलुषास्तस्य सहप्रस्थायिभिः
कृताः। पश्चात्प्रयायिभिः पंकाश्चक्रिरे मार्गनिम्नगाः ३३ मरुपृष्ठान्युदंभांसि नाव्याः सुप्रत
रा नदीः। विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ३४ स सेनां महतीं कर्षन्पूर्वसागरगामिनीं।
बभौ हरजटाभ्रष्टां गंगामिव भगीरथः। ३५ त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः। तस्यासी
दुल्बणो मार्गः पादपैरिव दंतिनः। ३६ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी। प्राप तालीव

र.४ न्रुयाभमुपकंठं महोदधेः ३७ अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव। आत्मा संरक्षितः
१० सुह्मैर्वृत्तिमाश्रित्य वैतसीं ३८ वंगानुत्खाय तरसा नेता नौसाधनोद्यतान्। निचखान जयस्तंभा
न्गंगास्रोतोंतरेषु सः ३९ आपादपद्मप्रणताः कलमा इव ते रघुं। फलैः संवर्द्धयामासुरुत्खातप्रति
रोपिताः ४० स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः। उत्कलादर्शितपथः कलिंगाभिमु
खो ययौ ४१ स प्रतापं महेंद्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत्। अंकुशं द्विरदस्येव यंता गंभीरवेदिनः
४२ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः। पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ४३ द्विषां १०
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनं। सन्मंगलस्नात इव प्रतिपेदे जयश्रियं ४४ वायव्यास्त्र

विनिर्धूतान्पक्षविक्षोभान्महोदधेः। जगाली कावळिंगतांस्यैः सर्पमिवाद्दे ४५ तांबूलीनां दलैस्तत्र
रचितापानभूमयः। नारिकेलासवं योधाः शात्रवं च पपुर्यशः ४६ गृहीतप्रतिमुक्तस्य स धर्मवि
जयी नृपः। श्रियं महेंद्रनाथस्य जहार न तु मेदिनीं ४७ ततो वेलातटेनैव फलवत्पूगमालिनीं।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ४८ स सैन्यपरिभोगेन गजदानसुगंधिना। कावे
रीं सरितां पत्युः शंकनीयामिवाकरोत् ४९ भयोत्सृष्टविभूषाणां तेन केरलयोषितां। अलकेषु चमूरे
णुश्चूर्णप्रतिनिधीकृतः ५० बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः। मारीचोद्भ्रांतहारीता
मलयाद्रेरुपत्यकाः ५१ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः। तुल्यगंधिषु मत्तेभकटेषु

र.४ फलरेणवः ।५२ अजानेयखुरक्षुण्णपङ्कैकाभिन्नसंभवं । व्यानशे स पदिव्योमकीटकोशाविकं र
२३ जः ५३ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं । नास्रंसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ५४ दिशि
मंदायते तेजो दक्षिणस्यां रवेरपि । तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे ५५ ताम्रपर्णीसमेत
स्य मुक्तासारं महोदधेः । ते निपत्य ददुस्तस्मै यशः स्वमिव संचितं ५६ स निर्विश्य यथाकामं तटेष्वा
लीनचंदनौ । स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ५७ असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितंबमिव मेदिन्याः स्रस्तांशुकमलंघयत् ५८ युग्मं तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः । रामास्त्रो
त्सारितोप्यासीत्सह्यलग्न इवार्णवः ५९ मरुलामारुतोद्धूतमगमत्कैतकं रजः । तद्योधवारबाणानाम २३

मयत्नपटवासतां ६० अभ्यभूयत वाहानां चरतां गात्रशिंजितैः । मर्मरैः पवनोद्धूतराजतालीव
नध्वनिः ६१ खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु । कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः
६२ अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ । अपरांतमहीपालव्याजेन रघवे करं ६३ मत्ते
भरदनोत्कीर्णव्यक्तविक्रमलक्षणं । त्रिकूटमेव तत्रोच्चैर्जयस्तंभं चकार सः ६४ पारसीकांस्ततो
जेतुं प्रतस्थे स्थलवर्त्मना । इंद्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ६५ यवनीमुखपद्मानां सेहे
मधुमदं न सः । बालातपमिवाब्जानामकालजलदोदयः ६६ संग्रामस्तुमुलस्तस्य पाश्चात्यैर
श्वसाधनैः । शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ६७ भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्म

१·४ हीम्। तस्तारसरघाव्याप्तैः स क्षौद्रपटलैरिव ६८ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययौ। ६९
२२ प्रणीपातप्रतीकारः संरंभो हि महात्मनां ६९ अपनीतशिरस्त्राणा विनयंते स्म तद्योधा मधुभिर्वि
जयश्रमं। आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ७० ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशं
। शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ७१ जितान् जयस्तानेव वह्नत्वारथपुरःसरान्। महार्ण
वमिवौर्वाग्निः प्रविवेशोत्तरापथं ७२ विनीताध्वश्रमास्तस्य वंक्षुतीरविचेष्टनैः। दुधुवुर्वाजिनः स्कं
सिंधु
धान्लग्नकुंकुमकेसरान् ७३ तत्राहूणावरोधानां भर्तृषु व्यक्तविक्रमं। कपोलपाटलादेशि बभू २२
व रघुचेष्टितं ७४ कांबोजाः समरे सोढुं तस्य वीर्यमनीश्वराः। गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमा

प्रवेश
र्द्धमानताः ७५ तेषां सदश्वभूयिष्ठास्तुंगद्रविणराशयः। विविशुस्तं विशांनाथमुदन्वंतमि
वापगा ७६ ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः। वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ७७
शशंस तुल्यसत्वानां सैन्यघोषेऽप्यसंभ्रमं। गुहाशयानां सिंहानां परिवृत्त्यावलोकितं ७८ भूर्जेषु
मर्मरीभूताः कीचकध्वनिहेतवः। गंगाशीकरिणो मार्गे मरुतस्तं सिषेविरे ७९ विशश्रमुर्नमेरू
णां छायास्वध्यास्य सैनिकाः। दृषदो वासितोत्संगा निषण्णमृगनाभिभिः ८० सरलासक्त
मातंगग्रैवेयस्फुरितत्विषः। आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ८१ तस्योत्सृष्टनिवासेषु
कंठरज्जुक्षतत्वचः। गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ८२ तत्र जन्यं रघोर्घोरं पार्वतीयैर्ग

र॰ ४ १ घोरभ्रन्। नारावक्षेपणीयास्त्रनिष्पेषोत्पतितानलं ८३ शरैरुत्सवसंकेतान्सकृत्वाविरतो
१२ त्सवान्। जयोदाहरणंबाह्वोर्गापयामासकिंनरान् ८४ परस्परस्यविज्ञातस्तेषूपायनपाणि
षु। राजाहिमवतःसारोराज्ञःसारोहिमाद्रिणा ८५ तत्राक्षोभ्यंयशोराशिंनिवेश्यावरुरोहसः।
पौलस्त्यतुलितस्याद्रेरादधानइवाह्रियं ८६ चकंपेतीर्णलौहित्येतस्मिन्प्राग्ज्योतिषेश्वरः। तद्ग
जालानतांप्राप्तैःसहकालागुरुद्रुमैः ८७ नप्रसेहेसरुद्धार्कमधारावर्षदुर्दिनं। रथवर्त्मरजो
प्यस्यकुतएवपताकिनीं ८८ तमीशःकामरूपाणामत्याखंडलविक्रमं। भेजेभिन्नकटैर्नागै १३
रन्यानुपरुरोधयैः ८९ कामरूपेश्वरस्तस्यहेमपीठाधिदेवतां। रत्नपुष्पोपहारेणछायामा

नर्चपादयोः ९० इतिजित्वादिशोजिष्णुर्न्यवर्त्ततरथोद्धतं। रजोविश्रामयन्राज्ञांछत्रशून्येषु
मौलिषु ९१ सविश्वजितमाजह्रेयज्ञंसर्वस्वदक्षिणं। आदानंहिविसर्गायसतांवारिमुचामिव
॥९२ सत्रांतेसचिवसखःपुरस्क्रियाभिर्गुर्वीभिःशमितपराजयव्यलीकान्। काकुत्स्थश्चिरवि
रहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने॥ ९३ तेरेखाध्वजकुलिशातपत्रचिह्नंस
म्राजश्चरणयुगंप्रसादलभ्यं। प्रस्थानप्रणतिभिरंगुलीषुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौ
रं ९४ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौरघुदिग्विजयोनामचतुर्थःसर्गः
श्रीः छः श्रीरघुनाथार्पणमस्तु छः श्रीः छः दुर्गायनमः छः श्रीः